**Kalika Prabha : Journal of Multidisciplinary Studies**
[ISSN:- 3021-9388 (Print)]
Published by Kalika Sanskrit Vidyapeeth (RMC) Nawalpur, Nepal
https//www.ksv.edu.np

# श्रीमद्भगवद्गीतायां ब्रह्मनिर्वाणाख्यमोक्षस्यावधारणा

**उमेशप्रसादघिमिरे (विद्यावारिधिः)**

*उपप्राध्यापकः, ने.सं.वि., वाल्मीकिविद्यापीठम्*

***Article History :*** *Received : 9th, Jan. 2026; Reviewed: 10th, March 2026; Accepted: 17th June, 2026*
***Corresponding Author*** *: Umesh Prasad Ghimire, PhD* ***E-mail :*** *ug2umesh@gmail.com*
***DOI :*** *https://doi.org/10.3126/kp.v4i1.97019*

## शोधसारः

*अद्वैतदर्शने श्रुतिस्मृतितर्कप्रस्थानत्वेनोपनिषत्-श्रीमद्भगवद्गीता-ब्रह्मसूत्राणि सङ्गृह्यन्ते। एतेषां प्रस्थानत्रयग्रन्थानां प्रमेयं प्रयोजनञ्चाभिन्नमिति प्रत्यगभिन्नं ब्रह्म श्रीमद्भगवद्गीतायाः प्रतिपाद्यो विषयः, आत्मज्ञानमेव निःश्रेयससाक्षात्साधनम्, जीवब्रह्मणोरैक्यावस्थितिरेव ब्रह्मनिर्वाणाख्या मुक्तिरिति विविच्य श्रीमद्भगवद्गीताभिव्यक्ता मोक्षसम्बद्धाऽवधारणाऽत्र सम्यगुपस्थापिता। ज्ञानकर्मसमुच्चयान्मोक्ष इति सिद्धान्तो नैव भगवद्गीतासम्मतः किन्तु सर्वकर्मसंन्यासपूर्वकात्मविज्ञानादेव मोक्ष इत्येव गीतातात्पर्यमित्यत्र सुनिश्चितम्। औपनिषदाद्वैतसिद्धान्त एव गीताशास्त्रस्य सिद्धान्त इति गीताभिव्यक्तमोक्षस्वरूपविचारमुखेनात्र सम्यक् प्रतिष्ठापितम्। गीताशास्त्रस्य प्रतिपाद्यं प्रवृत्तिधर्मं निवृतिधर्मञ्चाधिकृत्य प्रवृतिधर्मत्वेन कर्मयोगस्य निवृत्तिधर्मत्वेन च ज्ञानयोगस्य स्वरूपोपपादनपूर्वकं निष्कामकर्मयोगस्य परम्परया निःश्रेयसहेतुत्वमुपपादितञ्चेज्ज्ञानयोगस्य साक्षान्मोक्षसाधनत्वमत्रोपवर्णितम्। चित्तशुद्धि-चित्तैकाग्र्यद्वारा तत्त्वप्रतिपत्तिहेतुत्वेन कर्मण उपासनायाश्चात्र श्रीमद्भगवद्गीतायामुपदेशो विहितोऽस्तीति प्रदर्श्य ज्ञाननिष्ठैव मोक्षफलावसानेत्यत्र सम्यक् समीक्षितम्। गीताशास्त्रस्य मोक्षशास्त्रत्वं निश्चित्य परमार्थतत्त्वब्रह्मविज्ञानादद्वैतस्थितिरूपा मुक्तिरूपलभ्यत इत्यद्वैतदर्शनराद्धान्तोऽत्र निर्धारितः। सच्चिदानन्दैकरसरूपस्य ब्रह्मणोऽविद्ययातिरोधानं बन्धः, विद्ययाऽज्ञाननिवृत्तिश्च मोक्ष इति ब्रह्माद्वैतदर्शनसम्मतं मोक्षचिन्तनं विविच्य मुक्तौ न दुःखनिवृत्तिमात्रमपि तु निरतिशयानन्दस्फूरणञ्चात्रोपपादितम्। श्रीमद्भगवद्गीतानुसारं जीवनकाल एव मुक्तेरनुभवः, जीवतः पुरूषस्य कर्तृत्वभोक्तृत्वसुखदुःखादिलक्षणस्य क्लेशरूपस्य परिहारो मोक्षो विद्यते। अतोऽविद्यानिवृत्यर्थमेव प्रयासो विधातव्यः, सा चाविद्या विद्याविरोधिनीति ज्ञानमेव मोक्षसाधनमित्यद्वैतदर्शनराद्धान्तः सप्रमाणं सुनिश्चितः।*

**शब्दबीजानि-** ब्रह्मनिर्वाणम्, स्थितप्रज्ञः, कर्मयोगः, ज्ञाननिष्ठा, सत्त्वशुद्धिः, अनामयम्।

## शोधसमस्या-

'श्रीमद्भगवद्गीतायां ब्रह्मनिर्वाणाख्यमोक्षस्यावधारणा' इति शीर्षकीयशोधलेखे मोक्षस्वरूपं किमिति प्रधानाऽखण्डा च समस्या विद्यते। अत्रानया समस्यया सम्बद्धे प्रमुखसमस्ये निम्नलिखिते स्तः -

(क) श्रीमद्भगवद्गीतायां प्रतिपादितं मोक्षस्वरूपं कीदृशम् ?

(ख) श्रीमद्भगवद्गीतायां मोधसाधनं कर्म ज्ञानं वा किम् ?

## शोधोद्देश्यम् -

श्रीमद्भगवद्गीतासम्बद्धमोक्षस्वरूपप्रतिपादनमेवास्य शोधलेखस्य शीर्षकसम्बद्धं मुख्यमुद्देश्यम्। अतः प्रस्तुतसमस्यासम्बद्धे निम्नलिखिते द्वे उद्देश्ये स्तः -

(क) श्रीमद्भगवदीतायां ब्रह्माद्वैतास्थितिरेव मोक्षस्वरूपम्।

(ख) श्रीमद्भगवद्गीतायां केवलात्मज्ञानमेव मोक्षसाधनमिति निश्चय:।

## शोधक्षेत्रसीमाङ्कनम्-

श्रीमद्भगवद्गीतायामभिव्यक्तमोक्षसम्बद्धविचाराणामेवात्रालेखे समीक्षणं क्रियते। मोक्षतत्त्वेतरविषयाणामत्र चर्चा नैव कृतेति शोधलेखस्यास्य क्षेत्रं सीमा च।

## अध्ययनविधि:-

श्रीमद्भगवद्गीतायामभिव्यक्तस्य मोक्षस्वरूपस्य समीक्षणमूलेऽस्मिन्नध्ययने सामग्रीसङ्कलनाय पुस्तकालयीयकार्यं सम्पादितं विद्यते। गुणात्मकविधिना विहितवस्तुविवेचनेऽस्मिन्नालेखे विश्लेषणविधिर्हि बहुधा प्रयुक्तोऽस्ति।

## शोधान्तरालम् -

यद्यपि श्रीमद्भगवद्गीतासम्बद्धानि विविधविद्वज्जनैरनेकान्यनुसन्धानमूलकान्यध्ययनविश्लेषणादीनि कृतानि समुपलभ्यन्ते तथापि तेषु लेखरचनादिग्रन्थेषु मोक्षचिन्तनदृष्ट्या श्रीमद्भगवद्गीतायाः स्वरूपवैशिष्ट्यानि नैव प्रतिपादितान्युपलभ्यन्ते। अत्र च श्रीमद्भगवद्गीताभिमतमोक्षविषयकचिन्तनस्य सूक्ष्मरूपेणैकत्रानुसन्धानं विश्लेषणं वा विहितमस्ति। अतः श्रीमद्भगवद्गीतायां पूर्वविहितेषु मोक्षविषयकशोधलेखेष्वयं शोधलेखो नितरां वैशिष्ट्यमावहति। पूर्वकृतानुसन्धानात्मककार्यादेव गीताभिव्यक्ता मोक्षविषयिणी प्राज्ञिकजिज्ञासा पूर्णत: शान्ता न भवति। अतो मोक्षविषयकं विस्तृतमध्ययनमपरिहार्यमिति प्रस्तुतप्राज्ञिकसमस्यासमाधानायायमनुसन्धानात्मकलेखो विनिर्मितः। अस्मिन्नालेखे श्रीमद्भगवद्गीतायाः केन्द्रीयतायां मोक्षस्वरूपविवेचनपुरस्परं जीवन्मुक्तस्वरूपमोक्षसाधननिरूणाय विशेष: प्रयास: कृतोऽस्ति।

## विषयोपक्रमः-

पौरस्त्यदर्शनपरम्परायां सर्वोपरिदर्शनत्वेन प्रतिष्ठितस्य वेदान्तदर्शनस्य प्रस्थानत्रयी प्रसिद्धाऽस्ति। तत्रोपनिषत् श्रुतिप्रस्थानम्, श्रीमद्भगवद्गीता स्मृतिप्रस्थानम्, ब्रह्मसूत्रञ्च तर्कप्रस्थानम्। वेदोपनिषदर्थसारसङ्ग्रहरूपा श्रीमद्भगवद्गीता महाभारतात् समुद्धृता, सा चाष्टदशाध्यायेषु सप्तशतश्लोकेषु च संविभक्ता विद्यते।'ॐतत्सदिति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायामित्यादिपुष्पिकावाक्येनापि ब्रह्मविद्यैवास्याः गीतायाः प्रतिपाद्यविषयोऽस्तीति निश्चीयते। यदा जीव: परब्रह्मणोऽभिन्नत्वेन साक्षात्करोति तदाऽज्ञानसहिताज्जन्ममरणरूपबन्धनान्मुक्तो भवतीति परमं प्रयोजनं गीतायां निरूपितमस्ति। ब्रह्मविद्योपदेशपरेयं श्रीमद्भगवद्गीता संस्कृतवाङ्मयस्यैव सर्वोत्कृष्टा दार्शनिकी गीतास्ति। एतच्छास्त्रं भगवतोपदिष्टमुत्कृष्टं मोक्षशास्त्रमस्ति। जीवात्मनो ब्रह्मरूपत्वावाप्तिरेव परमपुरूषार्थ इति श्रीमद्भगवद्गीताया उपदेशः। अनवच्छिन्नानन्दावाप्तिरूपाया मोक्षदशायाः सम्बोधने श्रीमद्भगवद्गीतायां 'ब्रह्मनिर्वाणम्, बाह्मी स्थितिः, निस्त्रैगुण्यम्, नैष्कर्म्यम्, आत्यन्तिकं सुखम्, स्थितप्रज्ञः, गुणातीतः, जीवन्मुक्तः, ब्रह्मभावः, नित्यतृप्तः, अक्षयं सुखम्, निर्योगक्षेमः, आत्मवान्, सर्वत्र समदर्शिनः, अमृतत्त्वम्, समत्वम्, सर्वत्र समदर्शिनः, अभयपदम्, अनामयपदम्, अमृतत्त्वम्, ज्ञानी, परमगतिः, परा शान्तिश्चेत्यादिशब्दाः प्रयुक्ताः सन्दृश्यन्ते। ब्रह्मात्मैक्यस्थितौ बन्धमोक्षादिसर्वव्यवहारस्य समाप्तिर्भवति। परब्रह्मण्येकीभूतो मुक्तात्मा निरतिशयं क्षयशून्यरूपं परमानन्दमवाप्नोतीति श्रीमद्भगवद्गीताया मोक्षसम्बद्धाऽवधारणा विद्यते।

## श्रीमद्भगवद्गीतायां ब्रह्मनिर्वाणरूपमोक्षस्वरूपम्

बृहिवृद्धौ धातोर्मतिन् प्रत्ययेन निष्पन्नस्य ब्रह्मशब्दस्यार्थो भवति निरतिशयं वस्तु। 'बृंहति-वर्धते-निरतिशयमहत्त्व लक्षणवृद्धिमान् भवतीत्यर्थः। 'ब्रह्मपदं हि बृहिर्धातोर्व्युत्पन्नं भूमानमेव यत्र नान्यत्पश्यति। (छान्दोग्योपनिषद्-७/२४/१ : शाङ्करभाष्यम्) इति शङ्कराचार्योक्तेश्च सर्वभेदरहितं भूमातत्त्वमेव ब्रह्म विद्यते इति निश्चय:। 'बृहत्वाद् बृंहणत्वाद्वात्मैव ब्रह्मेति गीयते।' (अध्यासभाष्यम्-भामती) इति वाचस्पतिमिश्रोक्तेश्च बृहत्त्वेन बृंहणत्वेन वात्मैव ब्रह्म इति निश्चयो भवति। सर्वात्मकत्वेनात्मा बृहदस्ति, देहादेः परिणमयतृत्वेन बृंहणोऽप्यस्ति। देशगतकालगतवस्तुगतत्रिविध परिच्छेदशून्यमात्मतत्त्वं हि ब्रह्म विद्यते। 'यत्र नान्यत्पश्यति, नान्यच्छृणोति नान्यद्विजानाति स भूमा यो वै भूमा तदमृतम्।' (छान्दोग्योपनिषद्-७/२४/१), 'नित्यं विभुं सर्वगतं सुसूक्ष्मम्।' (मुण्डकोपनिषद्-२/२/९), 'सत्यं ज्ञानमनन्तं ब्रह्म' (तैतिरीयोपनिषद्-२/१/१), 'तच्छुभ्रंज्योतिषां ज्योति: (मुण्डकोपनिषद-२/२/९) इत्यादिश्रुतिवाक्यैर्ब्रह्मणि नित्यत्वसर्वव्यापकत्वस्वप्रकाशत्वचिद्रूपत्वादिकं निरूपितं निर्दिष्टं वाऽस्ति। तदुक्तं विद्यारण्यमुनिना-'अवेद्योऽप्यपरोक्षोऽतः स्वप्रकाशो भवत्ययम्। सत्यं ज्ञानमनन्तञ्चेत्यस्तीह ब्रह्मलक्षणम्॥' (पञ्चदशी-३/२८) अर्थादिन्द्रियजन्यज्ञानविषयत्वाभावेऽप्यपरोक्षत्वादात्मा स्वयंप्रकाशोऽस्ति । 'सत्यं ज्ञानमानन्तं ब्रह्म' इति श्रुतिनिर्दिष्टं ब्रह्मलक्षणमात्मनि विद्यमानत्वादात्मैव ब्रह्म वर्तते। ब्रह्मात्मनोरभेदस्थितिरेवात्मबोधस्य प्रयोजनम्। अस्यां दशायां सर्वं ब्रह्ममयं भवति। ब्रह्मभिन्नं किमपि नास्ति यत् किञ्च विद्यते तत्सर्वं ब्रह्मैव। ब्रह्मभिन्नं किमपि प्रतीयते चेत् तन्मरुमरीचिकेव मिथ्याऽस्ति। ब्रह्मनिर्वाणरूपमोक्षस्थिते:

स्वरूपं श्रुत्योपदिष्टञ्च यथा- 'ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥' (मुण्डकोपनिषद्-२/२/११) अर्थाद् विद्यादशायामिदमिति प्रतीतं सर्वं भेदजातं विद्यादशायामभेदे पर्यवसितं भवति। अर्थादविद्यादृष्टीनामग्रे प्रत्यवभासमानं सर्वं ब्रह्मैवास्ति, तथा पश्चाद् बह्म, दक्षिणत उत्तरेणाधस्तादूर्ध्वञ्च सर्वतोऽन्यदिवावभासमानं ब्रह्मैवास्ति। किं बहुना समस्तमिदं विश्वं ब्रह्मैव। 'अब्रह्मप्रत्ययः सर्वोऽविद्यामात्रो रज्ज्वामिव सर्वप्रत्ययः। ब्रह्मैवैकं परमार्थसत्यमिति वेदानुशासनम्।' (मुण्डकोपनिषद्-२/२/११ : शाङ्करभाष्यम्) एतादृश्यद्वैतस्थितिरेव मुक्तिस्तथाब्रह्मनिर्वाणावस्था विद्यते। यस्माल्लाभादन्य: परो लाभो न विद्यते, यस्मात् सुखात् परं सुखं न विद्यते, यस्माज्ज्ञानात्परं ज्ञानं नास्ति, यस्मात् परिपूर्णञ्चान्यन्नास्ति तदेव सच्चिदानन्दस्वरूपं शुद्धबुद्धमुक्तस्वभावं चिदेकरसं वा ब्रह्म, तद्ब्रह्मावाप्तिरेव ब्रह्मनिर्वाणस्थितिरिति श्रीमद्भगवद्गीताया उपदेशसार:।

'निर्' पूर्वसर्गाद् 'वा-गमने' धातोः 'क्त' (न) प्रत्ययेन निष्पन्नस्य निर्वाणशब्दस्यार्थ:-निर्वृत्तिः, अस्तगमनम्, विश्रान्तिः, मुनिभावः, शान्तिः, ऐक्यस्थितिः, साम्यावस्था, अपवर्गः, मोक्षो वा भवति। इयञ्च मोक्षस्थितिः श्रीकृष्णेन ब्रह्मनिर्वाणपदेनोपदिष्टा यथा-

'योऽन्तः सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव यः। स योगी ब्रह्मनिर्वाणं ब्रह्मभूतोऽधिगच्छति ॥

लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः ॥

कामक्रोधवियुक्तानां यतीनां यतचेतसाम्। अभितो ब्रह्मनिर्वाणं वर्तते विदितात्मनाम् ॥'(श्रीमद्भगवद्गीता-५/२४-२६) श्लोकत्रयाणामेतेषां शङ्कराचार्येण कृतं भाष्यमत्रोपस्थाप्यते यथा-

'कथंभूतश्च ब्रह्मणि स्थितो ब्रह्म प्राप्नोतीत्याह-यः' इति। योऽन्तः-सुखः, अन्तः-आत्मनि सुखं यस्य सोऽन्तःसुखः, तथान्तरेवात्मन्यारामः, आरमणं क्रीडा यस्य सोऽन्तरारामः, तथैवान्तरात्मैव ज्योतिः प्रकाशो यस्य सोऽन्तर्ज्योतिरेव। य ईदृशः स योगी ब्रह्मनिर्वाणं ब्रह्मणि निर्वृत्तिं-मोक्षम् इह-जीवन्नेव ब्रह्मभूतः सन् अधिगच्छति-प्राप्नोति ॥'१४॥ किञ्च-लभन्त इति। लभन्ते-ब्रह्मनिर्वाणं-मोक्षम्, ऋषयः-सम्यग्दर्शिनः संन्यासिनः, क्षीणकल्मषाः-क्षीणपापादिदोषाः, छिन्नद्वैधाः-छिन्नसंशयाः, यतात्मानः-संयतेन्द्रियाः सर्वभूतहिते रताः सर्वेषां भूतानां हित आनुकूल्ये रताः, अहिंसकाः इत्यर्थः ॥२५॥ किञ्च-कामेति। कामक्रोधवियुक्तानां-कामश्च क्रोधश्च कामक्रोधौ, ताभ्यां वियुक्तानां यतीनां संन्यासिनां यतचेतसां संयतान्तःकरणानाम्, अभितः उभयतो जीवानां मृतानां च ब्रह्मनिर्वाणं मोक्षो वर्तते विदितात्मनां विदितो ज्ञातः आत्मा येषां ते विदितात्मनस्तेषां विदितात्मनाम्, सम्यग्दर्शिनामित्यर्थः ॥२६॥' अर्थाद् ब्रह्मनिर्वाणं ब्रह्मानन्दं जीवन्नेवावाप्यते। परिपूर्णे ब्रह्मणि सर्वानर्थनिवृत्त्युपलक्षितां स्थितिं योगी प्राप्नोति। मुक्तिहेतोर्ज्ञानस्य साधनान्तरञ्च वेदविहितकर्मानुष्ठानञ्चात्र सङ्केतितम्। यज्ञादिनित्यकर्मानुष्ठानात् पापादिलक्षणं कल्मषं क्षीयते। ततश्च वेदान्तवाक्यानां श्रवणमननिदिध्यासनाद्यावृत्तेः सम्यग्दर्शनं जायते। अतः सम्यग्ज्ञानप्राप्तौ श्रवणादिना संशयनिरसनम्, कार्यकरणनियमनम्, दयालुत्वेनाहिंसकत्वमित्यादिकञ्च कारणं भवतीत्यत्र स्पष्टतयोल्लिखितम्। एवं मोक्षो नैव मृतानामेवापि तु जीवतामपि भवति चोपदिष्टम्। कामक्रोधवियुक्तानां यतचेतसां विदितात्मनां यतीनामभित उभयतः देहत्यागात्प्रागनन्तरञ्च ब्रह्मनिर्वाणसम्भवोऽस्तीति गीतायामभिव्यक्ता मोक्षसम्बद्धाऽवधारणा। एवमेव ब्रह्मण्याधाय सम्पाद्यमानः कर्मयोगश्च सत्त्वशुद्ध्यादिक्रमेण मोक्षाय भवतीति च

श्रीमद्भगवद्गीतोपदेशः। ब्रह्मभूतो योऽस्ति स एव ब्रह्मानन्दमवाप्नोति। कल्मषशून्यः, संशयछिन्नः, सर्वभूतहिते रतः सम्यग्दर्शी ऋषिरेव ब्रह्मनिर्वाणाख्यमोक्षस्याधिकारी। समत्वबुद्धेः फलमेव ब्रह्मनिर्वाणमस्ति। अतश्च समत्वबुद्धियुक्तः सन् मोक्षमार्गेऽग्रेसरणाय श्रीमद्भगवद्गीतायां सन्देशो मिलति, यथा-

'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि। ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥' (श्रीमद्भगवद्गीता-६/२९) अर्थाद् 'अहं ब्रह्मास्मि' इति ज्ञानमेव सम्यग्ज्ञानम्। एतज्ज्ञानञ्च समत्वबुद्धिरूपयोगस्य फलमस्ति। एतत्प्रकारकं सम्यग्ज्ञानं विनाऽज्ञानकार्यसंसारस्य निवृत्तिर्नैव सम्भवति। अज्ञानकृतेनात्मानात्मतादात्म्याध्यासेनैव भेदमूलकः संसार प्रयुक्तोऽस्ति। यथा स्थूलोऽहम्, काणोऽहम्, सुख्यहम्, दुःख्यहमित्यादि व्यवहारोऽज्ञानकृत एव। एवमेवाहमीश्वराद्भिन्नः, ममेश्वरः शास्तेत्यादिसंसारश्चाज्ञानकृत एवास्ति। अहं सच्चिदानन्दरूप आत्मा, न तु देहादिसंघातरूपोऽस्मि, अहं ब्रह्मैव, न तु तद्भिन्नः, ईश्वरश्च ब्रह्मैव, न तु तद्भिन्नः, चैतन्यरूपत्वात्। एतच्च सम्यग्ज्ञानम्। अज्ञानोकृतो भेदव्यवहारः संसारोऽस्ति, स च सम्यग्ज्ञानादेव निवर्तते। यथा रज्ज्वौ समारोपितः सर्पो रज्जुज्ञानं विना नैव निवर्तते तथैवात्मन्यारोपितः संसारोऽप्यात्मज्ञानं विना नैव निवर्तते। तस्माद् ब्रह्मात्मैकत्वज्ञानमेव संसारच्छेदकारणमिति श्रीमद्भगवद्गीतायाः सन्देशः। अतः संसाररूपस्यानर्थस्योच्छेदावस्थैव मोक्षस्थितिर्विर्तते, अर्थादात्मस्वरूपावस्थितिरेव श्रीमद्भगवद्गीतोपदिष्टा ब्रह्मनिर्वाणावस्था विद्यते। एतेन ब्रह्मनिर्वाणरूपस्य मोक्षस्य साधनं ब्रह्मात्मैक्यदर्शनमेव न तु कर्म, ज्ञानकर्मसमुच्चयो वा। परम्परया चित्तशुद्धिद्वारेण कर्म साधनं भवतु न तु साक्षात्साधनम्। एवमेव ज्ञानकर्मसमुच्चयोऽपि नैव मोक्षस्य साधनं भवितुमर्हति, कर्मज्ञानयोः समुच्चयानुपपत्तेः। कर्मसंसारयोः सहावस्थितिर्यथा सम्भवति तथा कर्मज्ञानयोः सहानुष्ठानं नैव संभवति। सर्वत्रैकत्वदर्शनेनैव मोक्षोऽवाप्यते चेत् कर्म तु क्रियाकारकादिभेदमूलकं भवति। ब्रह्मणोर्ब्रह्मज्ञानिनोर्वा सर्वव्यापकत्वमेव 'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि' (६/२९) इत्यादिना समुपदिष्टम्। तच्च श्रुत्यापि समुद्घोषितं यथा- 'यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति। सर्वभूतेषु चात्मानं ततो न विजुगुप्सते ॥' (ईशावास्योपनिषद्-६) यो ज्ञानी सर्वाणि भूतानि स्वव्यतिरिक्तानि न पश्यति, आत्मन्येवानुपश्यति वा, सर्वभूतेषु चात्मानमेव पश्यति स तस्मादेवाद्वैतदर्शनाद् सर्वभूतेषु न विजुगुप्सते, आत्मव्यक्तिरिक्ताभावात्। एवञ्च- 'यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्विजानतः। तत्र को मोहः कः शोक एकत्वमनुपश्यतः ॥' (ईशावास्योपनिषद्-७) अर्थाद् यस्मिन्काले सर्वाणि भूतानि परमार्थात्मदर्शनादात्मैवाभूदिति विजानतो विदुषः कृते तस्मिन् काले को मोहः कः शोको भवेत् ? अज्ञानिनः कृत एव शोकः मोहश्च। शोकमोहयोरविद्याकार्यत्वाज्ज्ञानिनः कृते शोकमोहयोरसम्भवः। एवञ्च 'तरति शोकमात्मवित्' (छान्दोग्योपनिषद्-७/१/३)। 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥' (मुण्डकोपनिषद्-२/२/८) इत्यादिश्रुतिभ्यश्चात्मज्ञानदशायां सकारणस्यात्यन्तमेवोच्छेदो भवतीति वेदान्तसिद्धान्तः।

## श्रीमद्भगवद्गीतायां मोक्षसाधनविवेकः

गीतानुसारं मोक्षस्य साधनं किम् ? कर्म, ज्ञानम्, तयोः समुच्चयो वेति संशयो भवति। यतो हि श्रीमद्भगवद्गीतायां 'कर्मण्येवाधिकारस्ते' (श्रीमद्भगवद्गीता-२/४७), 'कुरू कर्मैव तस्मात् त्वम्' (श्रीमद्भगवद्गीता-४/१५)

इत्याद्युपदेशवाक्यैः कर्मणोऽवश्यकर्तव्यता प्रदर्शिता चेदन्यत्र पुनः 'यज्ज्ञात्वाऽमृतमश्नुते' (श्रीमद्भगवद्गीता-१३/१२), 'ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्' (श्रीमद्भगवद्गीता-१८/१५) इत्याद्युपदेशवाक्यै: केवलं ज्ञानमेव मोक्षस्य साधनमिति प्रदर्शितम्। एवमेव कर्मापि सम्पाद्यम्, ज्ञानञ्चार्जितव्यमिति द्वयो: कर्तव्यत्वेनोपदिष्टत्वात् ज्ञानकर्मसमुच्चयो नि:श्रेयससाधनमिति सन्देह: समुत्पद्यते। तस्मादत्र नि:श्रेयससाधनविषयश्चर्चेयो विद्यते। भेदव्यवहारोऽविद्यामूलकोऽस्ति। भेदपूर्वकमेव कर्मानुष्ठीयते। ऐहलौकिकपारलौकिकवैयषिकसुखकामनया कर्माणि सम्पाद्यन्ते। तेनाप्यद्वितीयब्रह्मात्मभावमोक्षस्य साधनं कर्म न कथमपि भवितुमर्हति। स्वर्गादिवन्मोक्षो यदि कार्यः स्यात् तर्हि मोक्षस्य साधनं कर्म भवितुं शक्नुयात् किन्तु मोक्षो नैव कार्यः (जन्य:/साध्यो वा)। साध्यस्यैव वस्तुन: साधनं भवति, असाध्यभूतमोक्षस्य साधनं कर्म कथं स्यात् ? न केवलं वेदान्तदर्शन एवापि तु सर्वेषां वैदिकदर्शनानां मते मोक्षो नित्य एव। मोक्ष: खलु नोत्पाद्य:, न संस्कार्य:, नाप्य:, न च विकार्योऽस्ति। अयं तु ब्रह्मभावरूपो मोक्षो नित्यशुद्धबुद्धमुक्तस्वभावो विद्यते। अतो मोक्षस्य कर्मजन्यत्वेन कर्मसाधनत्वं नैपोपपद्यते। एवमेव प्रकाशान्धकारवत् परस्परविरूद्धस्वभावत्वेन ज्ञानकर्मसमुच्चयोऽपि मोक्षस्य साधनं नैव सम्भवति। ज्ञानस्य कर्मणश्च पृथक्त्वेन, तदनुष्ठानाधिकारिभिन्नत्वेन, तदनुष्ठानफलभिन्नत्वेन च परस्परभिन्नत्वमङ्गीकृत्यैव भगवता द्विविधा निष्ठा समुपदिष्टा विद्यते यथा-

'लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयाऽनघ। ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥' (श्रीमद्भगवद्गीता-३/३)

अभ्युदयेच्छुकाणां प्रवृत्तिमार्गानुयायिनां मुमुक्षुणाञ्च ज्ञाननिष्ठेति व्याख्यातं च शङ्कराचार्येण यथा- 'तत्र ज्ञानयोगेन ज्ञानमेव योगस्तेन साङ्ख्यानाम्-आत्मनात्मविषयकविवेकज्ञानवतां ब्रह्मचर्यादेव कृतसन्न्यासानां-वेदान्तविज्ञानसुनिश्चितार्थानां परमहंसपरिव्राजकानां ब्रह्मण्येवावस्थितानां निष्ठा प्रोक्ता, कर्मयोगेन-कर्मैव योगस्तेन कर्मयोगेन कर्मिणां निष्ठा प्रोक्तेत्यर्थ:।' (श्रीमद्भगवद्गीता-३/३ : शाङ्करभाष्यम्) एतेन कर्मज्ञानयोर्भिन्नाधिकारित्वेन भिन्नफलत्वेन च समुच्चयत्वेनानुष्ठानं नैव सम्भवति, तत्समुच्चयो न कथमपि मोक्षस्य साधनं भवतीति वेदान्तदर्शनसिद्धान्तः।

श्रीमद्भगवद्गीताया: प्राथमिकत्वेनोपदिष्टस्य कर्मणः कुत्रोपयोगित्वं सिद्ध्यति ? इति जिज्ञासायामुच्यते- सत्त्वशुद्धय एव कर्मण उपयोगिता भवति। 'केवलसत्त्वशुद्धिमात्रफलमेव तस्यः कर्मणः स्यात्।' (श्रीमद्भगवद्गीता-५/११ : शाङ्करभाष्यम्) अर्थाच्चित्तशुद्धिद्वारेण ज्ञानयोग्यतासम्पादने कर्मण उपयोगित्वं सिद्ध्यति। अत एवोच्यते- 'योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये।' (श्रीमद्भगवद्गीता-५/११) एतेनान्तःकरणशुद्धये कर्मण आवश्यकत्वमुपदिष्टमित्यवज्ञायते। एवञ्च 'यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्।' (श्रीमद्भगवद्गीता-१८/५) फलाभिलाषां परित्यज्य सम्पादितानि यज्ञादीनि मनीषिणां पावनानि (पवित्रीकरणसाधनानि) इति स्वीकृत्य ज्ञानयोगोपायत्वेन कर्मयोगस्याङ्गीकारो विहित:। अयमेव सिद्धान्तः 'न कर्मणा न प्रजया धनेन' (महानारायण्युपनिषद्-८/१४) इत्यादिश्रुत्यापि प्रतिपादितः। तथा चोक्तं शङ्कराचार्येण-

'न कर्मणा न प्रजया धनेनेति स्वयं श्रुतिः। कर्मणो मोक्षहेतुत्वं साक्षादेव निषेधति ॥

साक्षादेव तु कैवल्यमिति श्रुत्या निगद्यते। ज्ञानस्य मुक्तिहेतुत्वमन्यव्यावृत्तिपूर्वकम् ॥' (सर्ववेदान्तसिद्धान्तसारसङ्ग्रहः- १६८/१७०) अर्थात् कर्मणा मोक्षो न सम्भवति, केवलाज्ज्ञानादेव मोक्षो लभ्यते। 'एतद्बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्चभारत। (श्रीमद्भगवद्गीता-१५/२०) इत्युक्त्वा कृतकृत्यरूपमोक्षस्य साक्षात् साधनं ज्ञानमेवेति गीतायामुपदिष्टम्। 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वेताश्वतरोपनिषद्-३/८) इति श्रुतेश्च मोक्षस्य केवलं साधनं ज्ञानमेवेति निश्चीयते। एवञ्च-

'यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः। तदा देवमविज्ञाय दुःखस्यान्तो भविष्यति ॥' (श्वेताश्वतरोपनिषद्-६/२०) अर्थादात्मज्ञानव्यतिरेकेण मोक्षस्यासम्भवत्वमुपदर्शितम्। मोक्षस्य ज्ञानैकहेतुकत्वमुपदिष्टं यथा-

'ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः। तेषामादित्यवज्ज्ञानं प्रकाशयति तत्परम् ॥' (श्रीमद्भगवद्गीता-५/१६) आत्मविषयज्ञानेनात्मनोऽज्ञानं येषां नाशितं भवति तेषां ज्ञानं ज्ञेयं वस्तु सर्वमादित्यवत् प्रकाशयति, तदेव परमार्थतत्त्वम्। एतेन बुद्धिवृत्तिरूपं ज्ञानं न प्रकाशात्मकम् किन्तु प्रकाशकरणात्मकमेव, प्रकाशात्मकं ज्ञानं तु चैतन्यमेवेति सिद्धम्। 'ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति' (श्रीमद्भगवद्गीता-४/३९) इत्युपदेशात् सम्यग्दर्शनात् क्षिप्रमेव मोक्षो भवतीति सर्वशास्त्रन्यायप्रसिद्धः सिद्धान्तः सुनिश्चीयते। गीताया अयमेव सिद्धान्तः 'तरति शोकमात्मवित्' (छान्दोग्योपनिषद्-७/१/३), 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्डकोपनिषद्-२/२/९), 'तमेव विदित्वाऽति मृत्युमेति' (श्वेताश्वतरोपनिषद्-६/१५), 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ईशावास्योपनिषद्-७), 'भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ॥' (मुण्डकोपनिषद्-२/१८), 'आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्चन' (तैत्तिरीयोपनिषद्-२/९) 'अभयं वै जनक प्राप्तोऽसि' (बृहदारण्यकोपनिषद्-४/२/४), 'यस्तु विज्ञानवान् भवत्यमनस्कः सदा शुचिः। स तु तत्पदमाप्नोति यस्माद् भूयो न जायते ॥' (कठोपनिषद्-१/३/८), 'यो वेद निहितं गुहायां परमे व्योमन् सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चितः ॥' (तैत्तिरीयोपनिषद्-२/१), 'ब्रह्मविदाप्नोति परम्' (तैत्तिरीयोपनिषद्-२/१) इत्यादिवेदान्तशास्त्रसिद्धोऽस्ति।

## श्रीमद्भगवद्गीतायां मोक्षसुखस्य सर्वातिशायित्वविवेकः

आनन्दं ब्रह्मणो विद्वान् मुक्तपुरूषो बाह्यसांसारिकपदार्थो नैवापेक्षते स्वात्मनि नित्यतृप्तत्वात्। 'आत्मरतिरात्मक्रीडः' (छान्दोग्योपनिषद्-७/२५/१) इत्यादिश्रुतिप्रतिपादितः सिद्धान्तः श्रीमद्भगवद्गीतायां यथोपदिष्टः-

'न प्रहृष्येत् प्रियं प्राप्य नोद्विजेत् प्राप्य चाप्रियम्। स्थिरबुद्धिरसम्मूढो ब्रह्मविद् ब्रह्मणि स्थितः ॥

बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्। स ब्रह्मयोगयुक्तात्मा सुखमक्षयमश्नुते ॥' (श्रीमद्भगवद्गीता-५/२१-२२) अर्थाद् ब्रह्मवित् प्रियं प्राप्य न हृष्यति, अप्रियं प्राप्यापि नैवोद्विजते, स्थिरबुद्धिरसम्मूढश्च भवति, एवंविधो ब्रह्मविद् ब्रह्मणि स्थितो भवति। एवं यो बाह्यस्पर्शेष्वसक्तात्मा सन् आत्मनि सुखं विन्दति, ब्रह्मयोगयुक्तात्मा स एवाक्षयं सुखमश्नुते। विषयाणां क्षणिकत्वात् तत्सुखमपि क्षणिकं भवति चेदात्मनो नित्यत्वात् तत्सुखञ्च नित्यमिति श्रीमद्भगवद्गीताशयः। 'ब्रह्मविदाप्नोति परम्' (तैत्तिरीयोपनिषद्-२/१/१) इत्यादिश्रुत्युपदिष्टमोक्षसुखस्य परमत्वं यथोपदिष्टम्-

'यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः। यस्मिन् स्थितो न दु:खेन गुरूणाऽपि विचाल्यते ॥' (श्रीमद्भगवद्गीता- ६/२२) यमात्मलाभं सम्प्राप्य ततोऽधिकं लाभान्तरमस्तीति न मन्यते, यस्मिन्नात्मतत्त्वे स्थितो विद्वान् गुरूणा (महता) दु:खेनापि नैव विचाल्यत इति भावः। 'यस्मात्परं नापरमस्ति किञ्चिद्' (श्वेताश्वतरोपनिषद्-३/९) इत्यादिश्रुत्यापि मोक्षसुखस्य सर्वश्रेष्ठत्वमुपपादितम्। आत्मसुखस्य परमानन्दत्वेनात्मज्ञस्य कृते किमपि सुखं नैवावशिष्टं भवति, अत एवोपदिष्टं यथा- 'यावानर्थ उदपाने सर्वतः सम्प्लुतोदके। तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानतः॥' (श्रीमद्भगवद्गीता-२/४६) अर्थात् परिछिन्नेषु कूपतडागादिजलकुण्डेषु यत् स्नानपानादिकं कर्तुं सम्भवति तदपरिच्छिन्ने समुद्रेऽपि सहजतयैव सम्भवति यथा तथैव सर्वेषु वेदोक्तेषु कर्मसु यत्फलं तत्सर्वं परमार्थतत्त्वं विजानतः स्वत एव सम्भवति। एतेन सर्वव्यापिसुखान्यात्मसुखेऽन्तर्भवन्तीति श्रीमद्भगवद्गीतायां सुनिश्चितोऽर्थ:। अर्थाद् ब्रह्मानन्दे सर्वप्रकारकसुखफलान्यन्तगर्भितानि भवन्तीति वेदान्तसिद्धान्तः।

## श्रीमद्भगवद्गीतायां स्थितप्रज्ञस्य (जीवन्मुक्तस्य) स्वरूपविवेकः

जीवनकाल एव ब्रह्मनिर्वाणापन्नो व्यक्तिरेव जीवन्मुक्त इत्युच्यते। प्रारब्धकर्मवशात् सत्यपि देहे ब्रह्मनिष्ठो ब्रह्मसाक्षात्कारवान् जीवन्मुक्तोऽस्ति। तथा चोक्तं सदानन्देन यथा- 'जीवन्मुक्तो नाम स्वस्वरूपाखण्डब्रह्मज्ञानेन तदज्ञानबाधनद्वारा स्वरूपाखण्डब्रह्मणि साक्षात्कृतेऽज्ञानतत्कार्यसञ्चितकर्मसंशयविपर्ययादीनामपि बाधितत्त्वादखिदलबन्धरहितो ब्रह्मनिष्ठ:।' (वेदान्तसार:-६५, पृ.२२८) जीवन्मुक्त: प्रियं प्राप्यापि न हृष्यति, अप्रियञ्चावाप्यपि नोद्विजते, तादृशोऽसम्मूढः स्थिरबुद्धिर्ब्रह्मणि स्थितो ब्रह्मविदेव (श्रीमद्भगवद्गीता-५/२०) जीवन्मुक्तोऽस्तीति भगवतोपदिष्टम्। 'यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विदि पापं कर्म न श्लिष्यते।' (छान्दोग्यो पनिषद्-४/१४/३) इतिश्रुतेः जीवन्मुक्तस्य सञ्चितं कर्म दग्धं भवति चेत् कर्तृत्वबुद्धेरभावात् क्रियमाणं कर्म बाधितं भवति। एवमेव 'तदधिगम उत्तरपूर्वाधयोरश्लेषविनाशौ तद्व्यपदेशात्', 'इतरस्याप्येवमश्लेष: पाते तु' (ब्रह्मसूत्रम्-४/१/१३-१४) इति सूत्राभ्याञ्च ब्रह्मसाक्षात्कृतवत: जीवन्मुक्तस्य सञ्चितपापपुण्ययोर्विनाशो भवति चेत् क्रियमाणपापपुण्याभ्यां स जीवन्मुक्तोऽसम्बद्धो भवतीति प्रतिपादितमस्ति। तथोपदिष्टं भगवताऽपि-

'यथैधांसि समिद्धोऽग्निर्भस्मसात्कुरूतेऽर्जुन। ज्ञानाग्नि: सर्वकर्माणि भस्मसात्कुरूते तथा ॥' (श्रीमद्भगवद्गीता-४/३७) अर्थात् ज्ञानाग्नि: सर्वकर्माणि निर्बीजीकरोति। तथा चोक्तं शङ्कराचार्येण- 'न हि साक्षादेव ज्ञानाग्निः कर्माणीन्धनवद् भस्मीकर्तुं शक्नोति। तस्मात् सम्यग्दर्शनं सर्वकर्मणां निर्बीजत्वे कारणमित्यभिप्राय:। सामर्थ्याद् येन कर्मणा शरीरमारब्धं तत्प्रवृत्तफलत्वादुपभोगेनैव क्षीयते।' (श्रीमद्भगवद्गीता-४/३७ : शाङ्करभाष्यम्), 'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये।' (छान्दोग्योपनिषद्-६/१४/१) इति श्रुतेश्च सर्वाणि कर्माणि ज्ञानं कारणनिवर्तनेन निवर्तयतीति सिद्ध्यति। जीवन्मुक्तः पुण्यपापाभ्यामसम्बद्धो भवति, 'अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः' (छान्दोग्योपनिषद्-८/१२/१) इति श्रुतेश्च। सुकृतदुष्कृते जहाति, अनामयं पदं गच्छतीति यथा समुपदिष्टम्-

'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिण:। जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥' (श्रीमद्भगवद्गीता-२/५१) बुद्धियुक्ता: पुरूषा: कर्मजं फलं त्यक्ता मनीषिण: सन्त: जन्मबन्धविनिर्मुक्ता अनामयं पदं गच्छन्तीत्यन्वयः।

अर्थाच्चित्तशुद्धिद्वाराऽऽत्मज्ञाननिष्ठामवाप्य सच्चिदानन्दलक्षणमनामयं प्राप्नुवन्ति ज्ञानिनः। जीवन्त एव जन्मबन्धेन विनिर्मुक्ता भवन्ति, सर्वोपद्रवरहितं मोक्षमाप्नुवन्ति। ब्रह्मनिष्ठस्य स्थितप्रज्ञस्य का भाषा ? इत्यर्जुनेन समुपस्थापितस्य प्रश्नास्योत्तरक्रमेऽपि भगवता श्रीकृष्णेन जीवन्मुक्तस्वरूपमुपदिष्टम्। तत्रार्जुनस्य जिज्ञासा यथा-

'स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव। स्थितधी: कि प्रभाषेत किमासीत व्रजेत किम् ?।' (श्रीमद्भगवद्गीता-२/५४)

स्थितप्रज्ञस्य भाषा का ? तस्य भाषणं किम् ? किमासीत ? व्रजेत किम् ? इत्यादयः प्रश्ना अर्जुनेन समुपस्थापिता:। तत्रैव शङ्कराचार्येण स्थितप्रज्ञस्य व्युत्पत्तिर्यथा प्रदर्शिताऽस्ति 'स्थिता-प्रतिष्ठिता 'अहं परं ब्रह्म' इति प्रज्ञा यस्य स स्थितप्रज्ञ:।' (श्रीमद्भगवद्गीता-२/५४ : शाङ्करभाष्यम्, पृ.१२०) अर्थादहं ब्रह्मास्मीति प्रज्ञा यस्मिन् स्थिता भवति स एव स्थितप्रज्ञः। स एव ज्ञाननिष्ठो जीवन्मुक्तो वोच्यते। स्थितप्रज्ञाख्यस्य जीवन्मुक्तस्य स्वरूपमुपदिष्टं यथा-

'प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान्। आत्मन्येवात्मना तुष्ट स्थितप्रज्ञस्तदोच्यते ॥' (श्रीमद्भगवद्गीता-२/५५) यस्मिन् काले मनसि स्थितान् सर्वान् कामभेदान् परित्यजति, सर्वकर्मपरित्यागे प्रत्यगात्मस्वरूप एवात्मना तुष्ट: स्थितप्रज्ञ इत्युच्यते। स्थितप्रज्ञस्य स्वरूपमाचार्यशङ्करेण यथा प्रदत्तं पुनः-'स्थिता-प्रतिष्ठिता, आत्मानात्मविवेकजा प्रज्ञा यस्य स स्थितप्रज्ञो विद्वांस्तदोच्यते। त्यक्तपुत्रवित्तलोकैषण: संन्यासी आत्माराम आत्मक्रीड: स्थितप्रज्ञ इत्यर्थः।' (श्रीमद्भगवद्गीता-२/५५ : शाङ्करभाष्यम्, पृ.१२३) पुत्रवित्तलोकैषणां परित्यज्य खल्वात्मनि रममाणो ब्रह्मविदेव स्थितप्रज्ञोऽस्ति, तथा च श्रुति:- 'आत्मक्रीड आत्मरति: क्रियावानेष ब्रह्मविदां वरिष्ठ:।' (मुण्डकोपनिषद्-३/१/४) एवमात्मरतिरात्मक्रीड: कर्तव्यकर्मक्रियावान् स्थितप्रज्ञ एव ब्रह्मविदां वरिष्ठ इत्युपनिषदस्तात्पर्यम्। 'न मे पार्थास्ति कर्तव्यम्' (श्रीमद्भगवद्गीता-३/२२) इति वचनाद् यद्यपि भगवतः कर्तव्यं किमपि नैवावशिष्टन्तथापि 'वर्त एव च कर्मणि' (श्रीमद्भगवद्गीता-३/२२) इति वचनाद् भगवान् कर्मणि सम्प्रवृत्तोऽस्ति। एतेन कर्तव्यं कर्म नैव परित्यक्तव्यं ज्ञानिनापीत्यवबुद्ध्यते। जीवनसञ्चालनार्थं शरीरयात्रार्थं लोकसङग्रहार्थं वापि कर्म कर्तव्यमित्युपदेशः। एवञ्च स्थितप्रज्ञस्याभिलक्षणं पुनः समुपदिष्टं यथा –

'दुःखेष्वनुद्विग्नमना सुखेषु विगतस्पृहः। वीतरागभयक्रोध: स्थितधीर्मुनिरुच्यते ॥' (श्रीमद्भगवद्गीता-२/५६) ज्वरशिरोरोगाद्याध्यात्मिकदु:खे, व्याघ्रसर्पादिप्रयुक्ताधिभौतिकदु:खे, अतिवृष्टिशीतवातातपादिजन्यदु:खे चानुद्विग्नमना अस्ति, सुखेषु च विगतस्पृहोऽस्ति, रागश्च भयञ्च क्रोधश्च यस्माद् वीता स वीतरागभयक्रोधः। यदा पुरूष एवंविधो मुनिर्भवति तदा स्थितप्रज्ञ इत्युच्यते। ब्रह्मविदि विवेकजन्या प्रज्ञा कथं प्रतिष्ठिता भवतीति जिज्ञासायां भगवतोपदिश्यते 'यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम्। नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥' (श्रीमद्भगवद्गीता-२/५७)

'यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः। इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥' (श्रीमद्भगवद्गीता-२/५८)

यः सर्वत्रानभिस्नेहः सन् तत्तच्छुभाशुभं प्राप्य नाभिनन्दति, न द्वेष्टि, तस्य प्रज्ञा प्रतिष्ठिता भवति। तथा चोक्तं शङ्कराचार्येण-'यो मुनि: सर्वत्र-देहजीवितादिष्वपि, अनभिस्नेह:-अभिस्नेहवर्जित:, तत्तत्प्राप्य शुभाशुभं तत्

तच्छुभमशुभं वा लब्ध्वा नाभिनन्दति न द्वेष्टीत्यर्थ:। तस्यैवं हर्षविषादवर्जितस्य विवेकजा प्रज्ञा प्रतिष्ठिता भवति।' (श्रीमद्भगवद्गीता-२/५७ : शाङ्करभाष्यम्) एवमेव यदाऽयं कुर्मोऽङ्गानीव सर्वश इन्द्रियार्थेभ्य इन्द्रियाणि संहरते च तदा तस्य प्रज्ञा प्रतिष्ठिता भवति। एतेनेन्द्रियाणां विषयेभ्यो वैमुख्यकरणेन प्रज्ञास्थैर्यहेतुरिति निश्चीयते। अत एवोपदिष्टम्- 'तानि सर्वाणि संयम्य युक्त आसीत मत्पर:। वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥' (श्रीमद्भगवद्गीता-२/६१) इन्द्रियाणां विषयप्रावण्यं वारयित्वा मन आत्मनि समाधाय 'अहं ब्रह्मस्मीति यो नित्यमनुसन्धत्ते तस्येन्द्रियजयस्य प्रज्ञा प्रतिष्ठिता भवतीति निश्चितोऽर्थ:। यस्य बुद्धिर्ब्रह्मण्येव स्थिता भवति तस्य कृते न कोऽपि भयावह:। 'द्वितीयाद् वै भयं भवति' (बृहदारण्यकोपनिषद्-१/४/२) इति श्रुते:। 'तत्त्वमसि' (छान्दोग्योपनिषद्-६/८/७) इत्यादिश्रुतिवाक्यैर्ब्रह्मात्मैक्यप्रतिपादनाच्च, भयहेतुभूतद्वितीयस्यैवाभावो भवति। इयञ्च मान्यता 'यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात्'(ब्रह्मसूत्रम्-२/३/३०) इति सूत्राच्च निर्दिष्टा दृश्यते। 'यावदयमात्मा संसारी भवति, यावदस्य सम्यग्दर्शनेन संसारित्वं न निवर्तते, तावदस्य बुद्ध्या संयोगो न शाम्यति। यावदेव चायं बुद्ध्युपाधिसम्बन्धस्तावज्जीवस्य जीवत्वं संसारित्वञ्च। परमार्थतस्तु न जीवो नाम बुद्ध्युपाधिपरिकल्पितस्वरूपव्यतिरेकेणास्ति। न हि नित्यमुक्तस्वरूपात् सर्वज्ञादीश्वरादन्यश्चेतनो धातुर्द्वितीयो वेदान्तार्थनिरूपणायामुपलभ्यते।' (ब्रह्मसूत्रम्-२/३/३० : शाङ्करभाष्यम्) अर्थादात्मनो बुद्ध्या सह सम्बन्धो यदा भवति तदैव तदात्मनि जीवत्वस्य संसारस्य च दोष: सम्भवति, सम्यग्ज्ञाने सति तद्दोषो नैवावशिष्यते। 'तत्त्वमसि' (छान्दोग्योपनिषद्-६/८/७), 'अहं ब्रह्मास्मि' (बृहदारण्यकोपनिषद्-१/४/१०) इत्यादिश्रुतिभिरेतदेवाद्वैतं प्रतिपादितञ्च। संयतस्यैव पुरूषस्य प्रज्ञा प्रतिष्ठिता भवति नत्वसंयतस्य। तथोपदिष्टम्-

'या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यते मुने: ॥' (श्रीमद्भगवद्गीता-२/६९) अर्थात् सर्वभूतानां या निशा तस्यां संयमी जागर्ति, यस्यां भूतानि जाग्रति, पश्यतो मुने: सा निशाऽस्ति। अज्ञ आत्मराज्यं विषयीकर्तुं यथाऽसमर्थो भवति ज्ञानी मिथ्याभूतं व्यवहारजातं नैव विषयी करोति। अज्ञानिनां निशा सत्यपि स्थितप्रज्ञस्य विषय एव परमार्थतत्त्वम्। आत्मज्ञानशून्यानां कृतेऽद्वैतात्मा निशावदस्ति चेज्ज्ञानिनां कृते प्रकाशवदस्ति। अत एषणाशून्यो विद्वान् शान्तिमाप्नोति न कामकामी। तथोपदिष्टम्-

'आपूर्यमाणमचलप्रतिष्ठं समुद्रमापः प्रविशन्ति यद्वत्। तद्वत् कामा यं प्रविशन्ति सर्वे स शान्तिमप्नोति न कामाकामी ॥' (श्रीमद्भगवद्गीता-२/६०) अत्र भाष्यं द्रष्टव्यम्- 'आपूर्यमाणमद्भि:, अचलप्रतिष्ठम्- अचलतया प्रतिष्ठा-अवस्थितिर्यस्य तमचलप्रतिष्ठं समुद्रमापः सर्वतो गताः प्रविशन्ति स्वात्मस्थमविक्रियमेव सन्तं यद्वत्, तद्वत् कामा: विषयसन्निधावपि सर्वत इच्छाविशेषा: यं पुरुषं समुद्रमिवापोऽविकुर्वन्तः प्रविशन्ति सर्वे आत्मन्येव प्रलीयन्ते, न त्वात्मवशं कुर्वन्ति, स शान्ति- मोक्षम्- आप्नोति। नेतर: कामकामी। काम्यन्त इति कामा विषया: तान् कामयितुं शीलं यस्य स कामकामी नैव प्राप्नोतीत्यर्थ: ॥ (श्रीमद्भगवद्गीता-२/७० : शाङ्करभाष्यम्, पृ.१३९) यद्वत्- आप: आपूर्यमाणमचलप्रतिष्ठं समुद्रं प्रविशन्ति, तद्वत् सर्वे कामा यं प्रविशन्ति स: शान्तिमाप्नोति, कामकामी शान्तिं नाप्नोतीत्यर्थ:। यो निरहङ्कारो निर्ममश्चास्ति स एव शान्तिमवाप्नोति। तथा चोपदिष्टम्-

'विहाय कामान् यः सर्वान् पसर्माश्चरति निःस्पृहः। निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ॥' (श्रीमद्भगवद्गीता-२/७१) कामकामीनो मोक्षाभावात् निष्काम एव मोक्षाख्यां शान्तिमवाप्नोतीत्याशयः। यः पुमान् सर्वान् कामान् विहाय निःस्पृहो निर्ममो निरहङ्कारश्च सन् चरति स शान्तिमधिगच्छति। तथा चोक्तम्- 'स एवम्भूतः स्थितप्रज्ञो ब्रह्मवित् शान्तिं सर्वसंसारदुःखोपरमलक्षणां निर्वाणाख्याम्- अधिगच्छति प्राप्नोति। ब्रह्मभूतो भवतीत्यर्थः।' (श्रीमद्भगवद्गीता-२/७१ : शङ्करभाष्यम्, पृ.१४०), 'ब्रह्मवेद ब्रह्मैव भवति' (मुण्डकोपनिषद्-३/२/९) इति श्रुतेर्ब्रह्मज्ञानी ब्रह्मभावमवाप्नोतीत्याशयः। एवं स्थितप्रज्ञाख्यजीवन्मुक्तस्य पञ्चदशलक्षणानि श्रीमद्भगवद्गीतायां भगवताऽर्जुनं प्रति समुपदिष्टानि यथा- १. सर्वकामपरित्यागः, २. आत्मरतिः, ३. दुःखेष्वनुद्वेगः, ४. सुखेषु स्पृहाभावः, ५. रागभयक्रोधाभावः, ६. सर्वत्र स्नेहाभावः, ७. शुभप्राप्तावानन्दाभावः, ८. अशुभप्राप्तौ द्वेषाभावः, ९. इन्द्रियजयः, १०. प्रत्यग्ब्रह्मपरता, ११. समाहितचित्तत्वम्, १२. व्यवहारराहित्यम्, १३. निःस्पृहत्वम्, १४. निर्ममत्वम्, १५. निरहङ्कारत्वञ्चेति। एतानि च स्थितप्रज्ञत्वस्य साधनान्यपि विद्यन्ते। अर्थादेतानि पञ्चदश लक्षणानि यस्मिन् विद्यन्ते स स्थितप्रज्ञ इत्युच्यते। स्थितप्रज्ञस्य (ब्रह्मविज्ञानस्य) मोक्ष एव फलमिति सिद्ध्यति। सैषा ज्ञाननिष्ठा यथा स्तूयते-

'एषा ब्राह्मी स्थितिः पार्थ ! नैनां प्राप्य विमुह्यति। स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥' (श्रीमद्भगवद्गीता-२/७२) अस्य श्लोकस्य भाष्यमत्रावलोकनीयम्- 'एषा यथोक्ता ब्राह्मी ब्रह्मणि भवेयं स्थितिः, सर्वं कर्म संन्यस्य ब्रह्मरूपेणैवावस्थानमित्येतत्। हे पार्थ, न-एनां स्थितिं प्राप्य लब्ध्वा न विमुह्यति- न मोहं प्राप्नोति। स्थित्वाऽस्यां स्थितौ ब्राह्म्यां यथोक्तायाम् अन्तकालेऽपि अन्त्ये वयस्यपि ब्रह्मनिर्वाणं ब्रह्मनिवृत्तिं मोक्षम्- ऋच्छति- गच्छति। किमु वक्तव्यं ब्रह्मचर्यादेव संन्यस्य यावज्जीवं यो ब्रह्मण्येवावतिष्ठते स ब्रह्मनिर्वाणमृच्छतीति।' (श्रीमद्भगवद्गीता-२/७२ : शाङ्करभाष्यम्, पृ.१४१) अर्थात् 'न त्वेवाहं जातु नासम्' (श्रीमद्भगवद्गीता-१/१२) इत्यतः 'एषा ब्राह्मीस्थितिरित्यध्यायसमाप्तिपर्यन्तं समुपदिष्टा ब्रह्मविषयिणी चर्चैव ब्राह्मी स्थितिरस्ति। ब्रह्मणि भवेति ब्राह्मीति 'तत्र भवः' इति भवार्थेऽण्। ब्रह्मण्यवस्थानं ब्रह्मात्मस्वरूपानुसन्धानमिति वा मोक्षः। एतेनान्तिमश्लोकेन विदेहमुक्तिरुपवर्णिताऽस्ति। अभ्यासनैरन्तर्येण परमेश्वरानुग्रहणेन चावाप्तेयं ब्राह्मी स्थितिः शरीरपातसमयेऽपि (मरणदशायामपि) नैव वियुक्ता भवति। मरणकालेऽपि ब्राह्मीस्थितः सन् निश्रेःयसमवाप्नोति। शरीरपातसमकालीना हि मुक्तिर्विदेहमुक्तिरित्युच्यते। विदेहमुक्तिदशायां सद्रूपं ब्रह्ममात्रमवशिष्यते। 'ब्रह्मसंस्थोऽमृतत्त्वमेति' (छान्दोग्योपनिषद्-२/२३/१), 'आत्मैवेदं सर्वम्' (छान्दोग्योपनिषद्-७/१५/२), 'एकमेवाद्वितीयम्' (छान्दोग्योपनिषद्-६/२/१), 'अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (कठोपनिषद्-२/३/१४), 'न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति' (बृहदारण्यकोपनिषद्-४/४/६), 'पर्याप्तकामस्य कृतात्मनस्त्विहैव सर्वे प्रविलीयन्ति कामाः' (मुण्डकोपनिषद्-३/२/२), 'यथा नद्यः स्यन्दमानाः समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय। तथा विद्वान् नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम् ॥' (मुण्डकोपनिषद्-३/२/८), 'ब्रह्म वेद ब्रह्मैव भवति' (मुण्डकोपनिषद्-३/२/९) इत्यादिश्रुतिभिर्ब्रह्मविद् ब्रह्मण्येव लीनो भवति, तदन्यत्र तस्य गतिर्नास्तीति प्रतिपादितम्। एतद्ब्रह्माद्वैतावस्थानमेव श्रीमद्भगवद्गीतायां ब्रह्मनिर्वाणपदेनाभिहितम्।

## उपसंहारस्तथा निष्कर्ष:

अविद्यामूलकशोकमोहाभिभूतमर्जुनं प्रति परमकारूणिकेन भगवता श्रीकृष्णेन वेदान्तवाक्यसमाधिगम्यमद्वितीयं परमार्थ- तत्त्वमुपदिष्टमित्येतत् श्रीमद्भगवद्गीताशास्त्रं मोक्षशास्त्रत्वेन सुप्रसिद्धम्। एतस्मिन् शास्त्रे आत्मा अजो नित्य: शाश्वतोऽस्ति, हन्यमाने शरीरेऽवस्थितोऽपि 'जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यति चेति षड्भावविकारशून्योऽयमात्मा परमात्मनाऽभिन्नोऽस्तीति समुपदिष्टम्। अविद्ययैवात्मपरमात्मनोर्भेदव्यवहारः। तच्चावरकमविद्यारूपं तमः ज्ञानदीपेन यदा निवृतं भवति तदा ब्रह्मनिर्वाणावाप्तिर्भवति। ब्रह्मनिर्वाणास्थितिरेवामृतभावो नि:श्रेयसास्थितिर्मोक्षो वाऽस्ति। केवलमात्मज्ञानमेव परमनि:श्रेयससाधनम्। 'अहं कर्ता', 'मम कर्म', अमुष्मै फलायेदं कर्म करिष्यामि' इत्यादिक्रियाकारकफलभेदबुद्धिरूपाऽविद्येयमनादिकालादेव सम्प्रवृत्ता। एतस्या अविद्याया निवर्तकं 'अयमहमस्मि', 'केवलोऽकर्ताक्रियः, न मत्तोऽन्यः कश्चित्' इत्यात्मविषयकं ज्ञानमस्ति। अर्थात् कार्यप्रवृत्तिहेतभूताया भेदबुद्धेर्निवर्तकमभेदज्ञानमेव। मोक्षस्याकार्यत्वात् कर्म नैव साधनमिति निश्चीयते। यथान्धकारः कदाप्यन्धकारस्य निवर्तको न भवति तथैवाविद्यामूलकं कर्माविद्याया निवर्तकं नैव भवितुमर्हति। अविद्याया निवर्तकं प्रकाशस्वरूपं ज्ञानमेव। तदेव ज्ञानं ब्रह्मनिर्वाणाख्यमोक्षस्य साधनं सिद्धम्। ज्ञानप्राप्तियोग्यतासम्पादनायैव कर्मण उपयोगिता विद्यते। चित्तस्य शुद्धये कर्मण:, स्थिरतायै चोपासनाया आवश्यकता स्वीक्रियते। अतो ब्रह्मनिर्वाणस्य परम्परया साधनत्वेन कर्मणोऽङ्गीकारो वेदान्तदर्शने विहितोऽस्ति। सकामभावेनानुष्ठितं कर्म नि:श्रेयसप्राप्यते परम्परया साधनं भवतीति श्रीमद्भगवद्गीताया निष्कर्ष:। विवेकी खलु काम्यं कर्म न करोति, अतो भाविशरीरस्योत्पत्तिर्नैव भवति, वर्तमानञ्च शरीरारम्भकं कर्म फलोपभोगपर्यन्तं स्थितं सदपि ज्ञानी स्वस्वरूपे रममाणः सन् तिष्ठति। इयमेव स्वरूपावस्थानरूपा कैवल्यदशैव श्रीमद्भगवद्गीतायां ब्रह्मनिर्वाणावस्थाऽस्तीति समुपदिष्टम्। फलप्रदानाय कर्म खल्वङ्कुरितं भाव्यम्। कर्मणोऽङ्कुराय कामनाया आवश्यकता भवति। विवेकिना निष्कामेनानुष्ठितं कर्मानङ्कुरितं सदन्यजन्मनः कारणं नैव भवितुमर्हति। तस्मान्निष्कामभावनया लोकाचारार्थं शरीररक्षणार्थञ्चानुष्ठितं कर्म बन्धनस्य कारणं नैव भवति। अर्थात् फलाभिलाषापूर्वकमनुष्ठितमेव कर्म बन्धनस्य कारणं भवतीति श्रीमद्भगवद्गीताया उपदेशसारः। तस्मादविद्यामूलकानां शुभानामशुभानाञ्च समेषां कर्मणां नाशकमात्मस्वरूपज्ञानमेव। अविद्यारूपकाम एव कर्मणो बीजम, तस्मादविद्याकामकर्मभस्मीभूतायैकमात्रमग्निभूतं साधनं ज्ञानमस्ति। अविद्याया निवर्तनमेव ज्ञानस्य स्वरूपमस्ति। आत्मसाक्षात्कारपूर्वस्य भ्रन्तिप्रत्ययस्य कारणदेव कर्तृत्वभोक्तृत्वप्रभातृत्वरूपानर्थो दृष्ट:। अतः संसारो नैव परमार्थसत्योऽस्ति। परमार्थाभावेनैव सम्यग्दर्शनात् संसारभ्रमस्योपरमो भवति। सम्यग्दर्शने जाते सम्प्राप्त: केवलीभावावास्थैव ब्रह्मनिर्वाणदशाऽस्ति, सैव सच्चिदानन्दब्रह्माद्वैतस्थितिरेव मुक्तिः। इयञ्चाद्वैतावस्थितिरूपा ब्रह्मनिर्वाणाख्या मुक्ति: जीवनकाल एव सम्भवतीति जीवनोपयोगिनोर्मोक्षस्य ब्रह्माद्वैतस्वरूपम्, तस्य साक्षात्साधनञ्च स्वस्वरूपसाक्षाकार इति निश्चय एव श्रीमद्भगवद्गीताभिव्यक्ता मोक्षसम्बद्धाऽवधारणा ज्ञातव्या।

## सन्दर्भग्रन्थसूची

ईशादि दश उपनिषद्, नेपाली अनुवाद एवं विशेषव्याख्या, (२०७३), गिरि, रामानन्द, देवघाटधाम : महेश-संस्कृत-गुरूकुलम् ।

ईशादि नौ उपनिषद्, शाङ्करभाष्यसहिता (२०६८), गोरखपुर : गीताप्रेस ।

छान्दोग्योपनिषद्, शाङ्करभाष्यसहिता (२०६९), गोरखपुर : गीताप्रेस ।

पञ्चदशी, (ई. २००१), विद्यारण्यमुनिः, दिल्ली, वाराणसी : भारतीय विद्याप्रकाशन ।

बृहदारण्यकोपनिषद्, शाङ्करभाष्यसहिता: (२०६८), गोरखपुर : गीताप्रेस ।

ब्रह्मसूत्रशाङ्करभाष्यम्, (ई.१९९६), शङ्कराचार्यः, दिल्ली : परिमल पब्लिकेशन्स ।

वेदान्तसारः,तत्त्वपारिजातहिन्दीव्याख्यासहित: (ई.१९८३), सदानन्द, इलाहावाद : पीयूष प्रकाशन ।

शब्दकल्पद्रुम: (ई.२००२), (सम्पा.) देवराज-रमाकान्त, दिल्ली : राष्ट्रियसंस्कृतसंस्थान ।

शाङ्करवेदान्तकोश: (ई.१९९८), पाण्डेयः, मुरलीधरः, वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः ।

श्रीमद्भगवद्गीता-तत्त्वप्रकाश (२०७०), घिमिरे, दीर्घराज, भक्तपुर,काठमाडौँ : जनक शिक्षा सामग्री केन्द्र एवम् राजर्षि जनकस्मृति कोष ।

श्रीमद्भगवद्गीताभाष्यम् (२०७२), प्रथमखण्डः, शङ्कराचार्यः, वाराणसी : श्रीदक्षिणामूर्तिमठप्रकाशनम् ।

श्रीमद्भगवद्गीताभाष्यम् (२०७२), द्वितीयखण्डः, शङ्कराचार्यः, वाराणसी : श्रीदक्षिणामूर्तिमठप्रकाशनम् ।

श्रीमद्भगवद्गीता-भावार्थ (२०८०), देवघाटधाम : महेश संस्कृत गुरुकुलम् ।